# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - एप्रिल् २०१९

| | | |
|---|---|---|
| **कक्षा**-आचार्य-1(SEM-2) | **प्रश्नपत्रम्** - ५ | **गुणा:** - ७० |
| **विषय:** - साहित्यम् (ऐच्छिकम्) | **कोड- CE- 422** | **समय:** - ११ त: २ |
| **दिनाङ्क:** - १५/०४/२०१९ | **सन्दर्भग्रन्थ:**- उत्तररामचरितम् (४ त: ७ अङ्का:) | |

**॥ प्रथमान्विति: ॥** (Unit-1)

**प्रश्न: १ निम्नाङ्कितयो: कस्याप्येकस्य ससन्दर्भं व्याख्यां कुरुत ।** ०५

१. आसीदियं दशरथस्य गृहे यथा श्री: श्रीरेव वा किमुपमानपदेन सैषा ।
कष्टं बतान्यदिव दैववशेन जाता दु:खात्मकं किमपि भूतमहो विपाक: ॥

२. पञ्चप्रसूतेरपि तस्य राज्ञ: प्रियो विशेषेण सुबाहुशत्रु: ।
वधूचतुष्केऽपि यथैव नान्या प्रिया तनूजाऽस्य यथैव सीता ॥

**प्रश्न: २ चतुर्थाङ्के वर्णितं जनकस्य सीताविषयकं दु:खं वर्णयत ।** १०

अथवा

**कौसल्या-जनकयो: संवादं ग्रन्थानुसारं सरलसुरगिरा वर्णयत ।**

**॥ द्वितीयान्विति: ॥** (Unit-2)

**प्रश्न: ३ निम्नाङ्कितयो: कस्याप्येकस्य ससन्दर्भं व्याख्यां कुरुत ।** ०५

१. अतिशयितसुरासुरप्रभावं शिशुमवलोक्य तथैव तुल्यरूपम् ।
कुशिकसुतमखद्विषां प्रमाथे धृतधनुषं रघुनन्दनं स्मरामि ॥

२. कृशाश्वतनया ह्येते कृशाश्वात्कौशिकं गता: । अथ तत्सम्प्रदायेन रामभद्रे स्थिता इति ॥

**प्रश्न: ४ कुशलवयो: जृम्भकास्त्रप्राप्तिं लिखत ।** १०

अथवा

**कुमारविक्रमं यथाग्रन्थं वर्णयत ।**

**॥ तृतीयान्विति: ॥** (Unit-3)

**प्रश्न: ५ निम्नाङ्कितयो: कस्याप्येकस्य ससन्दर्भं व्याख्यां कुरुत ।** ०५

१. न किञ्चिदपि कुर्वाण: सौख्यैर्दु:खान्यपोहति । तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जन: ॥

२. अपि जनकसुतायास्तच्च तच्चानुरूपं स्फुटमिह शिशुयुग्मे नैपुणोन्नेयमस्ति ।
ननु पुनरिव तन्मे गोचरीभूतमक्ष्णोरभिनवशतपत्रश्रीमदास्यं प्रियाया: ॥

**प्रश्न: ६ लवं दृष्ट्वा रामस्य मन:स्थिति: कीदृशी जाता? इति सविस्तरं लिखत ।** १०

अथवा

**'कुमारप्रत्यभिज्ञानम्' यथाग्रन्थं साधयत ।**

**॥ चतुर्थान्विति: ॥** (Unit-4)

**प्रश्न: ७ निम्नाङ्कितयो: कस्याप्येकस्य ससन्दर्भं व्याख्यां कुरुत ।** ०५

१. मन्थादिव क्षुभ्यति गाङ्गमम्भो व्याप्तं च देवर्षिभिरन्तरिक्षम् ।
आश्चर्यमार्या सह देवताभ्यां गङ्गामहीभ्यां सलिलादुपैति ॥

२. त्वरस्व वत्स वैदेहि ! मुञ्च शालीनशीलताम् । एहि जीवय मे वत्सं प्रियस्पर्शेन पाणिना ॥

**प्रश्नः ८ 'गर्भनाटकम्' ( गर्भाङ्कः ) इत्यस्य नाटकीयदृष्ट्या महत्त्वम् उत्तररामचरितानुसारं प्रतिपादयत ।** **१०**

अथवा

**सप्तमाङ्कस्य वैशिष्ट्यं यथाग्रन्थं स्वसरलसुरगिरा लिखत ।**

**प्रश्नः ९ निम्नाङ्कितेषु दशप्रश्नानाम् अतिलघूत्तराणि यच्छत ।** **१०**

१. चतुर्थाङ्कस्य नाम किम्?

२. मुनिः याज्ञवल्क्यः कस्मै ब्रह्मपारायणं जगौ?

३. सीरध्वजः कस्य अपरं नाम?

४. कञ्चुकिनः किं नाम?

५. ''गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः'' इति केन उक्तम्?

६. पञ्चप्रसूतिः कः?

७. लक्ष्मणस्य पुत्रः कः?

८. अश्ववृत्तान्तः कस्मिन् अङ्के वर्णितः?

९. लक्ष्मणपुत्रस्य सारथेः नाम किम्?

१०. धीराः कीदृशीं वाचं कामधेनुम् आहुः?

११. पञ्चमाङ्कस्य किं नाम?

१२. विद्याधरप्रसङ्गः कस्मिन् अङ्के वर्णितः?

१३. रामः सीतायाः वियोगं कीदृशं मन्यते?

१४. षष्ठाङ्कस्य नाम किम्?

१५. सप्तमाङ्कस्य नाम किम्?

०००